# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – अक्टूबर, २०१९

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – वेदः (ऐच्छिकम्) **कोड – CE-4.1.1** समयः – ८.०० तः ११.००

दिनाङ्कः – १४/१०/२०१९ सन्दर्भग्रन्थः – वैदिकसूक्तसङ्ग्रहः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १** **द्वयोः एकस्य व्याख्या विधेया।** ०५

(१) स नः पितेव सूनवे अग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥

(२) उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।
अयं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

**प्रश्नः – २** **एकस्योत्तरं यथाभाष्यं देयम्।** १०

(१)यथाशास्त्रं पितृसूक्तस्य विषयवस्तु प्रस्तूयताम्।

(२)नासदीयसूक्तस्य दार्शनिकमहत्त्वं विवृणुत।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३** **द्वयोः एकस्य व्याख्या विधेया।** ०५

(१) यस्य व्रते पृथिवी नंन्नमीति यस्य व्रते शफवज्जर्भुरीति
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥

(२) अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वेदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥

**प्रश्नः – ४** **एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं देयम्।** १०

(१)वाक्सूक्तस्य दार्शनिकमहत्त्वं प्रतिपादयत।

(२)आधुनिकसमाजं प्रति अक्षसूक्तस्योपादेयता ।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५** **द्वयोः एकस्य व्याख्या विधेया ।** ०५

(१) यस्मिन्नृचः साम यजूँषि यस्मिन् प्रतिष्ठिता
रथनाभाविवाराः।
यस्मिंश्चित सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु॥

(२) अदितिर्द्यौरदितरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥

**प्रश्नः – ६** **एकस्योत्तरं यथाभाष्यं देयम् ।** १०

(१)शिवसंकल्पसूक्ताधारेण मनसः स्थिरीकरणोपायाः विवेचनीयाः ।

(२)भद्रसूक्तस्य विषयवस्तु प्रस्तूयताम् ।

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – ७** **द्वयोः एकस्य व्याख्या विधेया ।** ०५

(१)ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये ।
वागोजः सहौजो मयि प्राणापानौ ॥

(२)ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥

**प्रश्नः – ८** **एकस्योत्तरं देयम् ।** १०

(१) शान्तिपरकमन्त्राणां व्याख्यां कृत्वा जगतः कल्याणार्थं तेषां योगदानं निरूपयत ।

(२) पुरुषसूक्तस्य मन्त्राणामाधारेण सृष्टिप्रक्रियां वर्णयत ।

**प्रश्नः – ९** **निम्नलिखितेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं लिखत ।** १०

(क)नासदीयसूक्तस्य छन्दः किमस्ति?

(ख) ऋग्वेदस्य प्रथममन्त्रः कः?

(ग) कः "होता" इति पदेन सम्बोध्यते?

(घ) द्यूतनिन्दा कस्मिन् सूक्ते वर्तते ?

(ङ) मनसः पार्थना कुत्र श्रूयते ?

(च) "स्वधा" इति शब्दस्य अर्थ: कोऽस्ति ?

(छ) अक्षैर्मादीव्यः –इत्यस्य कोऽर्थ: ?

(ज) "शर्म" इति शब्दस्य कोऽर्थः?

(झ) "आनिषताः" इति शब्दस्य कोऽर्थः?

(ञ) पितृसूक्तस्य मण्डलक्रमः कः?

(ट) "स्वधा" इति शब्दस्य अर्थ: कोऽस्ति ?

(ठ) "आनो भद्राः" इत्यस्य कोऽर्थः?

(ड) "तेन त्यक्तेन भुञ्जीथा" इत्यस्य कोऽर्थः?

(ढ) "दोषावस्तः" इति शब्दस्य कोऽर्थः?

(ण) ईशोपनिषदि वर्णितम् आत्मनःस्वरूपं किमस्ति ?

***

# Answer Key

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** | गुणाः - ७०

विषयः – वेदः (ऐच्छिकम्) | **कोड – CE-4.1.1** | समयः –

दिनाङ्कः – | सन्दर्भग्रन्थः – वैदिकसूक्तसङ्ग्रहः

**प्रश्नः – ९**

(क) नासदीयसूक्तस्य छन्दः किमस्ति? - त्रिष्टुप्

(ख) ऋग्वेदस्य प्रथममन्त्रः कः? – अग्निमीळे पुरोहितं............. ॥

(ग) कः “होता” इति पदेन सम्बोध्यते? अग्निः

(घ) द्यूतनिन्दा कस्मिन् सूक्ते वर्तते ? कितवसूक्ते

(ङ) मनसः प्रार्थना कुत्र श्रूयते ? शिवसंकल्पसूक्ते

(च) “स्वधा” इति शब्दस्य अर्थः कोऽस्ति ? अन्नम्, भोग्यः

(छ) अक्षैर्मादीव्यः –इत्यस्य कोऽर्थः ?

(ज) “शर्म” इति शब्दस्य कोऽर्थः? सुखम्

(झ) “आनिषताः” इति शब्दस्य कोऽर्थः?

(ञ) पितृसूक्तस्य मण्डलक्रमः कः? १०/१५

(ट) “अनागाः” इति शब्दस्य अर्थः कोऽस्ति ? -निरपराधः

(ठ) “आनो भद्राः” इत्यस्य कोऽर्थः? अस्माकं कल्याणम्

(ड) “तेन त्यक्तेन भुञ्जीथा” इत्यस्य कोऽर्थः? इषणा त्रयं विहाय

(ढ) “दोषावस्तः” इति शब्दस्य कोऽर्थः? -अहर्निशम्

(ण) ईशोपनिषदि वर्णितम् आत्मनःस्वरूपं किमस्ति ?

शुक्र,अकाय,अव्रण,अस्नावीरम्,शुद्धम्,अपापविद्धम्, कविः, मनीषि, परिभूः, स्वयम्भूः..